भोजनं चोरयित्वा तु मक्षिका जायते नरः ।
हृत्वान्नञ्चैव मार्ज्जारस्तिलहृच्चैव मूषिकः ॥
घृतं हृत्वा च नकुलः काको मद्गुरमामिषम् ।
मधु हृत्वा नरो दंशः पूपं हृत्वा पिपीलकः ॥
अपो हृत्वा तु पापात्मा वायसः सम्प्रजायते ।
हृते कांस्ये च हारीतः कपोतो वा प्रजायते ॥
हृत्वा तु काञ्चनं भाण्डं कृमियोनौ प्रजायते ।
कार्पासिके हृते क्रौञ्चो वह्निहर्त्ता वकस्तथा ॥
मयूरो वर्णकं हृत्वा शाकं पत्रञ्च जायते ।
जीवञ्जीवकतां याति रक्तवस्त्रापहृन्नरः ॥
छुछुन्दरिः शुभान् गन्धान् वंशं हृत्वा शशो भवेत् ।
षण्ढः कलापहरणे काष्ठहृत् काष्ठकीटकः ॥
पुष्पापहृद्दरिद्रस्तु पङ्गुर्यानापहृन्नरः ।
शाकहर्त्ता च हारीतस्तोयहर्त्ता च चातकः ॥
गृहहृन्नरकान् गत्वा रौरवादीन् सुदारुणान् ।
तृणगुल्मलतावल्लीत्वक्सारतरुतां व्रजेत् ॥
एष एव क्रमो दृष्टो गोसुवर्णादिहारिणां ।
विद्यापहारी मूकश्च गत्वा च नरकान् बहून् ॥
असमिद्धेऽग्नौ हुते च मन्दाग्निः सम्प्रजायते ।
परनिन्दा कृतघ्नत्वं परमर्म्मावघातनम् ।
नैष्ठुर्य्यं निर्घृणत्वञ्च परदारोपसेवनम् ।
परस्वहरणाशौचं देवतानाञ्च कुत्सनम् ॥
निकृत्य वञ्चनं नृणां कार्पण्यञ्च नृणां वधः ।
उपलक्षणादि जानीयात् मुक्तानां नरकादनु ॥
दयाभूतेषु सम्वादः परलोकं प्रतिक्रिया ।



सत्यं हितार्थता चोक्तिर्वेदप्रामाण्यदर्शनम् ।
गुरुदेवर्षिपूजा च केवलं साधुसङ्गमः ।
सत्क्रियाभ्यसनं मैत्री स्वर्गिणां लक्षणं विदुः ।
अष्टाङ्गयोगविज्ञानात् प्राप्नोत्यात्यन्तिकं फलम्" ॥
इति गारुडे कर्म्मविपाकः २२९ अध्यायः ॥

शातातपभृगुभरतोक्तः पापरोगप्रायश्चित्तानां विवरणग्रन्थः। प्रायश्चित्तविहीनपापिनां नरकान्ते प्रतिजन्म तत्पापसूचितरोगयुक्तं शरीरं भवति । तेषां दुष्कर्म्मजा रोगा जपदेवार्च्चनहोमदानादिभिः शमं यान्ति ।*। महापातकजा रोगाः सप्तजन्मसु जायन्ते । तद्यथा—कुष्ठम् । राजयक्ष्मा । प्रमेहः । ग्रहणी । मूत्रकृच्छ्रम् । अश्मरी । कासः । अतीसारः । भगन्दरः । दुष्टव्रणः । गण्डमाला । पक्षाघातः । अक्षिनाशनम् । इत्यादयः । अत्र सम्पूर्णं प्रायश्चित्तम् ।*। उपपापोद्भवा रोगाः पञ्चजन्मसु जायन्ते । तद्यथाः—जलोदरम् । यकृत् । प्लीहा । शूलम् । व्रणः । श्वासः । जीर्णज्वरः । छर्द्दिः । भ्रमः । मोहः । गलग्रहः । रक्तार्ब्बुदम् । विसर्पः । इत्यादयः । अत्र अर्द्धं प्रायश्चित्तम् ।*।

पापसमुद्भवा रोगाः त्रिषु जन्मसु जायन्ते । तद्यथाः—दण्डापतानकः । चित्रवपुः । कम्पः । विचर्च्चिका । वल्मीकः । पुण्डरीकम् । इत्यादयः । अत्र पादांशं प्रायश्चित्तम् ।*। अतिपापात् अघं आद्याः रोगा भवन्ति अन्ये बहुधा रोगसङ्कराश्च ।*। अथ दानादिषु साधारणविधिः ।



गोदाने सुशीला सवत्सा पयस्विनी गौः । वृषदाने शुक्लवस्त्रकाञ्चनसहितः शुभोऽनड्वान् । भूदाने दशनिवर्त्तनपरिमिता भूः । सुवर्णदाने शतनिष्कं स्वर्णं तदर्द्धार्द्धं वा । अश्वदाने उपस्करसहितसुशीलाश्वः । महिषदाने स्वर्णायुधयुक्तमहिषी । गजमहादाने सुवर्णफलसहितगजः । देवार्च्चने लक्षोच्चावचपुष्पदानम् । ब्राह्मणभोजने सहस्रद्विजेभ्यो मिष्टान्नदानम् । रुद्रजपे लक्षसङ्ख्यकपुष्पकरणकत्र्यम्बकपूजनानन्तरं एकादशरुद्रजपः तद्दशांशसघृतगुग्गुलहोमः वरुणमन्त्रैरभिषेचनञ्च। धान्यदाने षष्ठिसङ्ख्यकखारी परिमितधान्यम् । वस्त्रदाने कर्पूरमिश्रितपट्टवस्त्रद्वयम् ।*।

अथ प्रायश्चित्तग्रहणानुष्ठानादि। दश पञ्चाष्टचतुरो वा ब्राह्मणानुपवेश्य तेषामनुज्ञया प्रायश्चित्तमुपक्रम्य विष्णुं सम्पूज्य निजकाम्यया सङ्कल्प्य द्विजेभ्यो धेनुं शक्तितो दक्षिणाञ्च दत्त्वा तान् वस्त्रालङ्करणैरलङ्कृत्य दण्डप्रमाणेन प्रायश्चित्तं याचेत । तेषामनुज्ञया प्रायश्चित्तं यथाविधि कृत्वा परिपूर्णार्थान् तान् यथाविधि अर्च्चयित्वा तेभ्योऽनुज्ञामाशिषश्च प्रतिगृह्य ब्राह्मणान् भोजयित्वा बन्धुभिः सह भोक्तव्यम् । इति शातातपीयकर्म्मविपाकप्रथमाध्यायविवरणम्।*। जन्मान्तरीयमहापातकशेषचिह्नकुनखादिरोगाणां प्रायश्चित्तं पराकव्रतं महापातकादतिपातकस्य गुरुत्वात्तच्छेषजन्यगलत्कुष्ठरोगस्य प्रायश्चित्तं द्विगुणम्। इति स्मार्त्ताः ।*।

## अथ शातातपोक्तहिंसास्तेयाऽगम्यागमनाऽगतिप्रायश्चित्तानि क्रमेण लिख्यन्ते ॥

| पापी | रोगी | प्रायश्चित्तम् |
|---|---|---|
| १ अजाघाती ... ... ... | १ अधिकाङ्गः ... ... ... | १ विचित्रवस्त्रयुक्तां अजां दद्यात् ॥ |
| २ अश्वहन्ता ... ... ... | २ वक्रतुण्डः ... ... ... | २ शतपलानि चन्दनानि दद्यात् ॥ |
| ३ उरभ्रघाती ... ... ... | ३ पाण्डुरोगी ... ... ... | ३ ब्राह्मणाय पलपरिमितकस्तूरिकां दद्यात् । |
| ४ उष्ट्रहन्ता ... ... ... | ४ विकृतस्वरः ... ... | ४ कर्पूरकं फलं दद्यात् ॥ |
| ५ काकघाती ... ... ... | ५ कर्णहीनः ... ... ... | ५ कृष्णां गां दद्यात् ॥ |
| ६ कारहन्ता ... ... ... | ६ रूक्षः... ... ... ... | ६ शुक्लवर्णवृषभं दद्यात् ॥ |
| ७ खरहन्ता ... ... ... | ७ खररोमा ... ... ... | ७ कृष्णगुल्मिवत् प्रायश्चित्तं कुर्य्यात् ॥ |
| ८ गजघाती ... ... ... | ८ सर्व्वकार्य्येष्वसिद्धार्थः ... | ८ प्रासादं कारयित्वा गणेशप्रतिमां स्थापयेत् अथवा कुलत्थशाकैः पूपैश्च गणशान्तिपूर्व्वकं लक्षसंख्यकगणेशमन्त्रं जपेत् ॥ |
| ९ गोत्रहा ... ... ... | ९ कुष्ठी निर्व्वंशश्च ... ... | ९ शतप्राजापत्यव्रतञ्चरित्वा ब्राह्मणाय भूमिं दक्षिणां दत्त्वा भारतं शृणुयात् ॥ |
| १० गोवधी ... ... ... | १० कुष्ठी ... ... ... | १० पञ्चपल्लवसंयुक्तपञ्चवर्णसमन्वितरक्तचन्दनलिप्ताङ्गरक्तपुष्पाम्बरान्वितैकरक्तकुम्भं दक्षिणस्यां दिशि संस्थाप्य तत्र तिलचूर्णपूरितताम्रपात्रं विन्यस्य तदुपरि निष्कमितसुवर्णनिर्म्मितयमदेवं पुरुषसूक्तमन्त्रेण संपूज्य पापं मे शाम्यतामिति प्रार्थयेत्। ततः सामविद् ब्राह्मणस्तत्र कलसे सामपारायणं कुर्य्यात् । ततो दशांशं सर्षपं दत्त्वा पात्रमाल्याभिषेचनं कुर्य्यात् । ततो "यमोऽपि महिषारूढ़ो दण्डपाणिर्भयानकः । दक्षिणाशापतिर्देवो मम पापं व्यपोहतु" ॥ इति मन्त्रेण यजमानो यमं विसृज्य तं आचार्य्याय निवेद्य सद्भक्तिमाचरेत् ॥ |
| ११ तरक्षुहन्ता ... ... ... | ११ केकरेक्षणः... ... ... | ११ गुल्ममयीं धेनुं दद्यात् ॥ |